अर्पणम्—अनेन तर्पणाख्यकर्मणा श्रीपरमेश्वरः प्रीयतां न मम । ॥इतिदेवर्षिमनुष्यपितृतर्पणविधिः॥

यज्ञोपवीत धारण करने का मन्त्र—

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।

यज्ञोपवीत त्यागने का मन्त्र—

एतावद्दिनपर्यन्तं ब्रह्म त्वं धारितं मया । जीर्णत्वात्त्वत्परित्यागो गच्छ सूत्र यथासुखम् ॥

पार्थिवपूजनविधिः ।

जहां शंकर जी का पूजन अभीष्ट हो, पूजन कर्ता गङ्गा की मिट्टी या शुद्ध मिट्टी लेकर शिव जी को बनावे तदनन्तर शिवलिंग को बाएँ हाथ पर रखकर—ॐ शिवाय नमः इस मन्त्र से पूजनादि सब कार्य करे । किसी किसी आचार्य का मत है कि—

"मृदाहरण संघट्टे प्रतिष्ठाह्वानमेव च, स्नपनं पूजनं चैव विसर्जनमतः परम् । हरोमहेश्वरश्चैव शूलपाणिः पिनाकधृक् । रुद्रः पशुपतिश्चैव महादेव इति क्रमः । अर्थात्-ॐहरायनमः इस मन्त्र से मिट्टी लेकर ॐमहेश्वरायनमः इस मन्त्र से पानी डालकर साने और गोल बनावे, बाद में ॐ शूलपाणये नमः इस मन्त्र से प्रतिष्ठा कर ॐपिनाक धृषे नमः इस मन्त्र से आवाहन कर ॐरुद्राय नमः से स्नान तथाॐपशुपतये नमः से पूजन और ॐ महादेवायनमः से विसर्जन कर दूसरे दिन मूर्ति को बहते हुए जल में छोड़ देवे ।

अथ गोदान प्रयोगः—कर्त्ता कृतनित्यकृत्यः । पुण्यकाले सवत्सा धेनुं द्विजं च यथाविभवं वस्त्रालंकारादिभिः सम्पूज्य गोशृङ्गमूलादिस्तनान्तस्थानादिषु देवताः पूजयेत् । तद्यथा शृङ्गमूले ब्रह्मविष्णुभ्यां नमः । ब्रह्मविष्णूं पूजयामि शृङ्गाग्रे सर्वतीर्थेभ्यो नमः सर्वतीर्थानि पूजयामि एवं सर्वत्र शिरोमध्ये शिवाय । ललाटे देव्यै नमः । नासिकायां षण्मुखाय । नासापुटयोः कम्बलाश्वतरनागाभ्यां० कर्णयोः अश्विभ्यां० चक्षुषोः शशिभास्कराभ्याम् । दन्तेषु वायवे, जिह्वायां वरुणाय । हुंकारे सरस्वत्यै गंडयोः पक्षमासाभ्याम् । ओष्ठयोःसन्ध्याद्वयाय । ग्रीवायाम् इन्द्राय । कुक्षिदेशे रक्षोभ्यः उरसि साध्येभ्यः । पादेषु धर्माय जंघासु अर्यम्णे खुरमध्ये गंधर्वेभ्यः खुराग्रे पन्नगेभ्यः खुरपश्चिमागे अप्सरोभ्यः । पृष्ठे एकादशरुद्रेभ्यः । सर्वसन्धिषु वसुभ्यः । श्रोणीतटे पितृभ्यः लाङ्गले सोमाय पुच्छे आदित्यरश्मिभ्यः । गोमूत्रे गङ्गायै । गोमये यमुनायै । क्षीरे सरस्वत्यै । दध्नि नर्मदायै । घृते अग्नये । रोमसु अष्टाविंशतिदेवकोटिभ्यः । उदरे पृथिव्यै । पयोधरेषु चतुःसमुद्रेभ्यश्चतुरः समुद्रान्पूजयामि एता देवताः अभ्यर्च्य सम्पूज्य अद्यैतद्ब्रह्मणो द्वितीय परार्धे इत्यादिना देशकालौ सङ्कीर्त्य गोत्रायशर्मणे सुपूजितां पृथ्वीदानसमफलकामः सर्वपापक्षयकामः विष्णुप्रीतिकामः इमां प्रत्यक्षधेनुं सुवर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं घंटा-ग्रैवेयकां मुक्तालाङ्गूलां कांस्योपदोहनीं सितवसनद्वयोपेतां सर्वाभरणभूषितां सोपस्करां रुद्रदैवत्यां तुभ्यमहं सम्प्रददे नमम तिलं-पात्रं घृतावर्तं गोपुच्छं कृत्वा विप्रहस्ते सतिल कुशोदकं दद्यात्—

मन्त्रस्तु—यज्ञसाधनभूताय विश्वस्याघविनाशिनी । विश्वरूपधरो देवः प्रीयतामनया गवा । ततोदाता दान प्रतिष्ठा सिद्ध्यर्थं सुवर्णदक्षिणां दद्यात्-प्रार्थयेत्-नमोगोभ्यः श्रीमतीभ्य सौरभेयीभ्य एव च । नमोब्रह्मसुताभ्यश्चपवित्राभ्यश्चनमो नमः । पूजितासि वशिष्ठेन विश्वामित्रेण धीमता । सुरभी हर मे पापं यन्मया दुष्कृतं कृतम् । गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्, धेनुं दत्वा प्रदक्षिणीकृत्य किञ्चिदनुव्रजेत् ॥ इति प्रयोगः ॥

॥ बलिवैश्वदेवचक्रम् ॥

भोजन तैयार होने पर बलि वैश्वदेव का प्रयोग करना चाहिए । निम्नांकित चक्र को जल से बनाकर, तदनुसार चक्र के पास एक तरफ अग्नि और एक तरफ जल रखकर क्रमानुसार दिए गए मन्त्रों द्वारा उक्त देवों का आवाहन पूजन करे ।



पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः । कण्डनी चोदकुम्भस्तु वध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्वासाम् निष्कृत्यर्थं महर्षिभिः । पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
पञ्चैतान्यो महायज्ञान् न हापयतिशक्तितः । स गृहेऽपि वसन् नित्यं सूना दोषैर्न लिप्यते ॥

चूल्हा, चक्की, झाड़ू, ऊखल तथा पीने के लिये जहां पानी रखा जाता है । इन पांचो स्थानों में जीवों के मरने की सम्भावना रहती है । उन दोषों के निवृत्ति के लिए पञ्च महायज्ञ का विधान है । यदि पञ्च महायज्ञ न कर सके तो कम से कम प्रतिदिन भोजन बन जाने पर नमक रहित थोड़ा सा सामान निकाल कर पांच बार हवन के रूप में अग्नि में डाल देवे । धार्मिक घरों में जिसे प्रायः सभी स्त्रियाँ करती हैं ।

१—अध्यापन, (ब्रह्मयज्ञ कहा जाता है) ।
२—तर्पण (पितृयज्ञ) कहलाता है ।
३—होम (देव यज्ञ) कहलाता है ।
४ बलि (भूत यज्ञ) कहलाता है ।
५—अतिथिपूजन (नृयज्ञ) कहलाता है

कार्त्तिकेधात्रीपूजा ।

तत्र संकल्पः देशकालादि संकीर्त्तनानन्तरं नामगोत्रोच्चारणानन्तरं सर्वपापक्षयद्वारा श्रीदामोदर प्रीत्यर्थं धात्रीमूले श्रीदामोदरपूजां करिष्ये—पुरुषसूक्तेन षोडशोपचारैः संपूज्य गन्धपुष्पफलयुतमर्घ्यं दद्यात् । अर्घ्यं गृहाण भगवन् सर्वकामप्रदो भव । अक्षया संततिर्मेऽस्तु दामोदर नमोऽस्तु ते ॥ ततो धात्रीं कुङ्कुमगन्धादिनाऽभ्यर्च्य पुष्पैः पूजयेत्—धात्र्यै नमः । शान्त्यै नमः । मेधायै नमः । प्रकृत्यै नमः । विष्णुपत्न्यै नमः । महालक्ष्म्यै नमः । रमायै नमः । कमलायै नमः । इन्दिरायै नमः । लोकमात्रे नमः । कल्याण्यै नमः । कमनीयायै नमः । सावित्र्यै नमः । ततस्तर्पणं कार्यम् सव्येन ।

पिता पितामहश्चान्यो अपुत्रा ये च गोत्रिणः । ते पिबन्तु मयादत्तं धात्रीमूलेऽक्षयं पयः ॥

धात्री का नाम आंवला है । इसके पूजन का विधान धार्मिक ग्रन्थों में विशेष रूप से लिखा है । मुख्यतया कार्तिक मास में आंवले का पूजन और वृक्ष के नीचे भोजन करने का अत्यधिक महत्व है । इसका सारांश यह है कि नगर में बसने वाली जनता भी निर्धारित किसी समय पर घर से बाहर जाकर स्वच्छ वायु मण्डल के सुख का अनुभव प्राप्त कर सके ।

श्रीतुलसीपूजाविधिः ।

केशवाय नमः इत्यादिना, तीन बार आचमन करके हस्त प्रक्षालन करे । संकल्प—देशकालौ संकीर्त्य ममात्मनः पुराणोक्तफलप्राप्त्यर्थं तथा पत्न्यासह अखण्डसुखसौभाग्यसन्तत्यायुरारोग्यैश्वर्याभिवृद्धिप्राप्तये श्रीतुलसीदेवीप्रीत्यर्थं तुलसीपूजनमहं करिष्ये—

श्रीतुलस्यै नमः इतिमन्त्रेण षोडशोपचारैः सम्पूज्य प्रदक्षिणां कृत्वा मन्त्रपुष्पयुक्तो नमस्कारः । तन्मन्त्रः ।—विष्णुप्रियकरे देवि तुलसि सुखदायिके । पुष्पाञ्जलिंप्रयच्छामि पत्युरायुष्यवर्धिके ॥ अथ प्रार्थना—

सौभाग्यं सन्ततिं देहि धनं धान्यं च मे सदा । आरोग्यं शोकशमनं कुरु मे माधवप्रिये ॥
पूतनाभयसन्त्रासाद्रक्षितश्च यथा हरिः । तथा संसारसंत्रासाद्रक्ष मे वंशमुत्तमम् ॥

प्रत्येक धार्मिक गृहस्थों के घर स्त्रियां तुलसी का पेड़ लगाकर नित्य पूजा करती हैं । इसके पूजन का शास्त्रों में अत्यधिक महत्व कहा गया है ।

सरस्वतीशयनम्

सरस्वत्याऽऽह्वानं तदङ्ग पूजनं च करिष्यइति, संकल्प्य—तत्र मूले आवाहनं, पूर्वाषाढासु पूजनं, उत्तराषासु बलिदानं तदङ्गभूतं पूजनं तदनन्तरं श्रवणे विसर्जनाङ्गपूजां कृत्वा विसर्जयेत् ।

भावार्थ—सभी विद्याप्रेमी व्यक्तियों को चाहिए कि आश्विन शुक्ल में जिस दिन मूल नक्षत्र हो उस दिन अपनी २ पुस्तकों को स्वच्छ कर रखें और तीन दिन तक उक्त पूजनादि करें ।

गोवर्धन पूजा—(अन्नकूट)—कार्तिक शुक्ल प्रतिपदा के दिन—व्रजवासी लोग इन्द्र की पूजा किया करते थे, भगवान् कृष्ण ने उक्त दिन इन्द्र का पूजन न कराकर गोवर्धन पूजा कराई और गोवर्धन के रूप में सभी पकवान जिसे व्रजवासियों ने श्रद्धा पूर्वक गोवर्धन को चढ़ाया था, स्वयं भोग लगाया, फलतः इन्द्र कुपित होकर प्रलय कालिक मेघों द्वारा भीषण वृष्टि कराने लगे । जिससे व्रजवासी त्रस्त हो गये । अन्त में उनके रक्षण के लिए भगवान् ने गोवर्धन को उठाया, यह कथा श्रीमद्भागवत के दशम स्कन्ध में विस्तृत है । इस दिन गोपूजन, और गोवर्धन पूजन का विशेष महत्व है ।

होली (होलिकादाह)—भक्त प्रह्लाद की बूआ ढुंढा नाम की राक्षसी थी । अपने भाई हिरण्यकश्यपु की आज्ञा से प्रह्लाद को जलाने के लिए तैयार हुई । वरदान के कारण अग्नि देव उसे नहीं जला सकते थे । उक्त तिथि के दिन भक्त प्रह्लाद को गोदी में लेकर जलती हुई अग्नि में उसने प्रवेश किया । किन्तु भगवान् की कृपा से भक्त प्रह्लाद बच गये और वह जल गई । अतः प्रह्लाद की प्रसन्नता में यह उत्सव मनाया जाता है ।

शुद्धषष्ट्यंशचक्रम्।

विषमे	सं.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.	अंशादि	समे
घोर	१	१	२	३	४	५	६	७	८	९	१०	११	१२	०।३०	इन्दुरेखा
राक्षस	२	२	३	४	५	६	७	८	९	१०	११	१२	१	१।०	भ्रमण
देव	३	३	४	५	६	७	८	९	१०	११	१२	१	२	१।३०	पयोधि
कुबेर	४	४	५	६	७	८	९	१०	११	१२	१	२	३	२।०	सुधांशु
यक्ष	५	५	६	७	८	९	१०	११	१२	१	२	३	४	२।३०	अतिशीतल
किन्नर	६	६	७	८	९	१०	११	१२	१	२	३	४	५	३।०	क्रूर
भ्रष्ट	७	७	८	९	१०	११	१२	१	२	३	४	५	६	३।३०	सौम्य
कुलघ्न	८	८	९	१०	११	१२	१	२	३	४	५	६	७	४।०	निर्मल
गरल	९	९	१०	११	१२	१	२	३	४	५	६	७	८	४।३०	दण्डायुध
अग्नि	१०	१०	११	१२	१	२	३	४	५	६	७	८	९	५।०	कालाग्नि
आप	११	११	१२	१	२	३	४	५	६	७	८	९	१०	५।३०	प्रवीण
प्रेतपुरीष	१२	१२	१	२	३	४	५	६	७	८	९	१०	११	६।०	इन्दुमुख
अपांपति	१३	१	२	३	४	५	६	७	८	९	१०	११	१२	६।३०	दंष्ट्राकराल
मरुत्वान	१४	२	३	४	५	६	७	८	९	१०	११	१२	१	७।०	शीतल
काल	१५	३	४	५	६	७	८	९	१०	११	१२	१	२	७।३०	कोमल
महिमा	१६	४	५	६	७	८	९	१०	११	१२	१	२	३	८।०	सौम्य
अमृत	१७	५	६	७	८	९	१०	११	१२	१	२	३	४	८।३०	कालरूप
चन्द्र	१८	६	७	८	९	१०	११	१२	१	२	३	४	५	९।०	उत्पात
मृद्वंश	१९	७	८	९	१०	११	१२	१	२	३	४	५	६	९।३०	वंशक्षय
मृदु	२०	८	९	१०	११	१२	१	२	३	४	५	६	७	१०।०	कलिनाश
पद्म	२१	९	१०	११	१२	१	२	३	४	५	६	७	८	१०।३०	विषदग्ध
ब्रह्म	२२	१०	११	१२	१	२	३	४	५	६	७	८	९	११।०	पूर्णचन्द्र
विष्णु	२३	११	१२	१	२	३	४	५	६	७	८	९	१०	११।३०	अमृत
महेश्वर	२४	१२	१	२	३	४	५	६	७	८	९	१०	११	१२।०	सुधांशु
देव	२५	१	२	३	४	५	६	७	८	९	१०	११	१२	१२।३०	कण्टक
आर्द्र	२६	२	३	४	५	६	७	८	९	१०	११	१२	१	१३।०	यम
कलिनाश	२७	३	४	५	६	७	८	९	१०	११	१२	१	२	१३।३०	घोर
क्षितीश्वर	२८	४	५	६	७	८	९	१०	११	१२	१	२	३	१४।०	दावाग्नि
कमलाकर	२९	५	६	७	८	९	१०	११	१२	१	२	३	४	१४।३०	काल
मान्दी	३०	६	७	८	९	१०	११	१२	१	२	३	४	५	१५।०	मृत्यु
मृत्यु	३१	७	८	९	१०	११	१२	१	२	३	४	५	६	१५।३०	मान्दी
काल	३२	८	९	१०	११	१२	१	२	३	४	५	६	७	१६।०	कमलाकर
दावाग्नि	३३	९	१०	११	१२	१	२	३	४	५	६	७	८	१६।३०	क्षितीश्वर
घोर	३४	१०	११	१२	१	२	३	४	५	६	७	८	९	१७।०	कलिनाश
यम	३५	११	१२	१	२	३	४	५	६	७	८	९	१०	१७।३०	आर्द्र
कण्टक	३६	१२	१	२	३	४	५	६	७	८	९	१०	११	१८।०	देव
सुधांशु	३७	१	२	३	४	५	६	७	८	९	१०	११	१२	१८।३०	महेश्वर
अमृत	३८	२	३	४	५	६	७	८	९	१०	११	१२	१	१९।०	विष्णु
पूर्णचन्द्र	३९	३	४	५	६	७	८	९	१०	११	१२	१	२	१९।३०	ब्रह्मा
विषदग्ध	४०	४	५	६	७	८	९	१०	११	१२	१	२	३	२०।०	पद्म
कलिनाश	४१	५	६	७	८	९	१०	११	१२	१	२	३	४	२०।३०	मृदु
वंशक्षय	४२	६	७	८	९	१०	११	१२	१	२	३	४	५	२१।०	मृद्वंश
उत्पात	४३	७	८	९	१०	११	१२	१	२	३	४	५	६	२१।३०	चन्द्र
कालरूप	४४	८	९	१०	११	१२	१	२	३	४	५	६	७	२२।०	अमृत
सौम्य	४५	९	१०	११	१२	१	२	३	४	५	६	७	८	२२।३०	महिमा
कोमल	४६	१०	११	१२	१	२	३	४	५	६	७	८	९	२३।०	काल
शीतल	४७	११	१२	१	२	३	४	५	६	७	८	९	१०	२३।३०	मरुत्वान्
दंष्ट्राकराल	४८	१२	१	२	३	४	५	६	७	८	९	१०	११	२४।०	अपांपति
इन्दुमुख	४९	१	२	३	४	५	६	७	८	९	१०	११	१२	२४।३०	प्रेतपुरीष
प्रवीण	५०	२	३	४	५	६	७	८	९	१०	११	१२	१	२५।०	आप
कालाग्नि	५१	३	४	५	६	७	८	९	१०	११	१२	१	२	२५।३०	अग्नि
दण्डायुध	५२	४	५	६	७	८	९	१०	११	१२	१	२	३	२६।०	गरल
निर्मल	५३	५	६	७	८	९	१०	११	१२	१	२	३	४	२६।३०	कुलघ्न
सौम्य	५४	६	७	८	९	१०	११	१२	१	२	३	४	५	२७।०	भ्रष्ट
क्रूर	५५	७	८	९	१०	११	१२	१	२	३	४	५	६	२७।३०	किन्नर
अतिशीतल	५६	८	९	१०	११	१२	१	२	३	४	५	६	७	२८।०	यक्ष
सुधांशु	५७	९	१०	११	१२	१	२	३	४	५	६	७	८	२८।३०	कुबेर
पयोधि	५८	१०	११	१२	१	२	३	४	५	६	७	८	९	२९।०	देव
भ्रमण	५९	११	१२	१	२	३	४	५	६	७	८	९	१०	२९।३०	राक्षस
इन्दुरेखा	६०	१२	१	२	३	४	५	६	७	८	९	१०	११	३०।०	घोर

शुद्धत्रिंशांशचक्रम्

अं.	मि. मे. तु. सिं. कुं. ध.	क. वृ. वृ. क. मी. म.
१	१	७
२	२	८
३	३	९
४	४	१०
५	५	११
६	६	१२
७	७	१
८	८	२
९	९	३
१०	१०	४
११	११	५
१२	१२	६
१३	१	७
१४	२	८
१५	३	९
१६	४	१०
१७	५	११
१८	६	१२
१९	७	१
२०	८	२
२१	९	३
२२	१०	४
२३	११	५
२४	१२	६
२५	१	७
२६	२	८
२७	३	९
२८	४	१०
२९	५	११
३०	६	१२

शुद्धदशमांशचक्रम्।

मे. तु.	वृ. वृ.	मि. ध.	क. म.	सिं. कुं.	क. मी.	अंशाः
१	११	९	७	५	३	३।०
२	१२	१०	८	६	४	६।०
३	१	११	९	७	५	९।०
४	२	१२	१०	८	६	१२।०
५	३	१	११	९	७	१५।०
६	४	२	१२	१०	८	१८।०
७	५	३	१	११	९	२१।०
८	६	४	२	१२	१०	२४।०
९	७	५	३	१	११	२७।०
१०	८	६	४	२	१२	३०।०

शुद्धषोडशांशचक्रम्।

चर मे. क. तु. म.	स्थि. वृ. सिं. वृ. कुं.	द्वि. भे. मि. क. ध. मी.	अंशादि
१	५	९	१।५२।३०
२	६	१०	३।४५।०
३	७	११	५।३७।३०
४	८	१२	७।३०।०
५	९	१	९।२२।३०
६	१०	२	११।१५।०
७	११	३	१३।७।३०
८	१२	४	१५।०।०
९	१	५	१६।५२।३०
१०	२	६	१८।४५।०
११	३	७	२०।३७।३०
१२	४	८	२२।३०।०
१	५	९	२४।२२।३०
२	६	१०	२६।१५।०
३	७	११	२८।७।३०
४	८	१२	३०।०।०

शुद्धद्रेष्काणचक्रम्।

मे. सिं. ध.	वृ. क. म.	मि. तु. कुं.	क. वृ. मी.	अंशाः
मे.	क.	तु.	म.	१०
वृ.	सिं.	वृ.	कुं.	२०
मि.	क.	ध.	मी.	३०

शुद्धसप्तमांशचक्रम्।

मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.	अंशादि
१	८	३	१०	५	१२	७	२	९	४	११	६	४।१७।८
२	९	४	११	६	१	८	३	१०	५	१२	७	८।३४।१७
३	१०	५	१२	७	२	९	४	११	६	१	८	१२।५१।२५
४	११	६	१	८	३	१०	५	१२	७	२	९	१७।८।३४
५	१२	७	२	९	४	११	६	१	८	३	१०	२१।२५।४२
६	१	८	३	१०	५	१२	७	२	९	४	११	२५।४२।५१
७	२	९	४	११	६	१	८	३	१०	५	१२	३०।०।०

नोट – शुद्ध दशवर्ग में द्वादशांश उसी राशिसे २।३० अंशसे गणना करना तथा नवमांश जानने का प्रकार अन्यत्र पृष्ठ ६६ में दिया गया है इसी तरह दशवर्ग बनानेकी प्रथा प्राचीन महर्षियोंको अभिमत थी। प्राचीन क्रमसाध्यसिक है। विशेष विवरण जाननेके लिए गुरुवर ओझा जी की बनायी फलितविकास नामकी पुस्तक को देखए। मैं आशा करता हूँ कि विद्वजन इन बातों पर विचार कर अपनी सम्मति देकर मुझे अनुगृहीत करेंगे।

सूर्यादि ग्रहों के उच्च संवत् २०२४ मेषसंक्रमण काल के – सू. उ. ०।१७।१७।३६ चं. उ. १।१२।४८।१८ मं. उ. ४।१०।२।४६ बु. उ. ७।१०।२८।३२ बृ. उ. ५।२१।२२।४८ शु. उ. २।१९।५२।३३ श. उ. ७।२६।२७।३५ यही उच्च सूर्य सिद्धान्तानुसार उपलब्ध होता है।

शुद्ध होराचक्रम्।

मे. वृ. मि. क. सिं. क.						
तु.	वृ.	ध.	म.	कुं.	मी.	अंशाः
मे.	मि.	सिं.	तु.	ध.	कुं.	१५
वृ.	क.	क.	वृ.	म.	मी.	३०

सर्वघातचक्रम्

रोगार्ते गमने रणे नो मङ्गले।

जन्म रा.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.
सू. घा.	४	८	१२	५	९	१	६	१०	७	११	२	३
चं. घा.	१	५	९	२	६	१०	३	७	४	८	११	१२
मं. घा.	५	९	१	६	१०	२	७	११	८	१२	३	४
बु. घा.	२	६	१०	३	७	११	३	८	५	९	१२	१
गु. घा.	६	१०	२	७	११	३	८	१२	९	१	४	५
शु. घा.	७	१०	३	८	१२	४	९	१	११	२	५	६
श. घा.	३	७	११	४	८	१२	५	९	६	१०	१	२
रा. घा.	८	७	६	४	५	१०	१२	१	२	९	११	३
के. घा.	८	७	१०	१	११	५	६	४	२	३	१२	९
मा. घा.	का.	मा.	पौ.	मा.	फा.	चै.	वै.	ज्ये.	आ.	श्रा.	भा.	आ.
ति. घा.	१ ६ ११	५ १० १५	२ ७ १२	२ ७ १२	३ ८ १३	५ १० १५	४ ९ १४	१ ६ ११	३ ८ १३	४ ९ १४	३ ८ १३	५ १० १५
वार घात	सू.	श.	चं.	बु.	श.	श.	गु.	शु.	शु.	मं.	गु.	शु.
न. घा.	म.	ह.	स्वा.	अनु.	मू.	श्र.	श.	रे.	भ.	रो.	आ.	श्ले.
यो. घा.	वि.	श.	प.	धृ.	प्री.	शु.	शु.	ब्र.	वै.	गं.	व्या.	व.
ल. घा.	१	२	४	७	१०	१२	६	८	९	११	३	५
ग्र. घा.	मं.	शु.	बु.	चं.	सू.	बु.	शु.	मं.	गु.	श.	श.	गु.
घा. घा.	पि.	वा.	स.	क.	पि.	वा.	स.	क.	पि.	वा.	स.	क.
व. घा.	क्ष.	वै.	शू.	वि.	क्ष.	वै.	शू.	वि.	क्ष.	वै.	शू.	वि.
सं. घा.	पु.	स्त्री.	पु.	स्त्री.	पु.	स्त्री.	पु.	स्त्री.	पु.	स्त्री.	पु.	स्त्री.
स. घा.	क्रू.	सौ.	क्रू.	सौ.	क्रू.	सौ.	क्रू.	सौ.	क्रू.	सौ.	क्रू.	सौ.
सं. घा.	च.	स्थि.	द्वि.	च.	स्थि.	द्वि.	च.	स्थि.	द्वि.	च.	स्थि.	द्वि.
वर्ण घा.	र.	श्वेत.	हरि.	पांडु.	धूम.	चित्र.	कृष्ण.	कन.	पी.	कृ.	धूम्र	श्वेत

अथ लोके प्रसिद्धिसत्वात्—गृहनिर्माणे मण्डलेशानयनम्—स्वामिहस्तप्रमाणेन दीर्घविस्तार संयुतम्। द्विगुणं वाष्टभिर्भक्तं मण्डलाधिप उच्यते॥ इंद्रो विष्णुर्यमो-वायुः कुबेरो धूर्जटिस्तथा। विधाता विघ्नराजश्च मण्डलेशाः प्रकीर्तिताः॥ अथा-ऋणप्रमाणम्—(दीर्घ विस्तार) × ३/८ हृता विघ्नदाणो भीषः कलहो नृप दानवः। क्लीबश्चौरो धनीचेति नामतुल्य फलं स्मृतम्।

गणेशचतुर्थी (बहुला) कथा

श्रीगणेश उवाच॥ भद्रे भाद्रपदेमासि संकष्टाख्याचतुर्थिका। अनेकफलदा लोकानांसर्वसिद्धि प्रदायिनी॥२॥ पूजा पूर्वविधानेन तस्य कार्य्या समन्ततः। विधोदं तु प्रवक्ष्यामि भोजनादिषु पार्वति॥३॥ श्रीकृष्णउवाच—एवं निगदिते पुत्रे पुत्रः पप्रच्छ पार्वती। को विधिः प्रकर्तव्यः पूजने भोजनेषु च॥४॥ श्रीगणेश-उवाच—गुरुसिद्धिमार्गेण भक्त्या तद्व्रतमाचरेत्। द्वादशस्वपि मासेषु पूजनामभिरर्चयेत्॥५॥ विनायकस्त्वेकदन्तः कृष्णपिंगो गजाननः। लम्बोदरो भालचन्द्रो हेरम्बो विकटस्तथा॥६॥ वक्रतुण्डश्चतुर्थो विघ्नराजो गणाधिपः। द्वादशैतानि नामानि चैतैर्नामभिः पुष्पैर्व्रती॥७॥ द्वादशस्वपि मासेषु पूज्यते नामभिः पृथक्॥ चतुर्थ्यां प्रातरुत्थाय तिलकृत्य यथाविधि॥८॥ नलोऽधुनासीत्कृतयुगे पुण्यश्लोको नराधिपः। तस्य रूपवती भार्या दमयन्तीति विश्रुता॥९॥ तस्य दैववशाच्छापः स्त्रीवियोगो विवादकृत्। तदा देव्या कृतं ह्येतद् व्रतानामुत्तमं व्रतम्॥१०॥ पार्वत्युवाच—केन वै विधिना पुत्र दमयन्त्योदितोत्तमम् चकार भूपति तेन तुष्टेन नाति शोभना॥११॥ श्रीकृष्णउवाच—एवं निगदितः पार्वं पर्वेषा गणनायकः। प्रोवाच वचनं धीमान् विस्तरेण शृणुष्व तत्॥१२॥ श्रीगणेश-उवाच—मातर्नलस्य भूपस्य विपत्तिर्विपुलाऽभवत्॥ गजाश्वं गजशालायां मंदुरायां तथा हताः॥१३॥ कोशस्तु तस्करैर्नीतो गृहं दग्धं कृशानुना। नलोऽपि विपदाक्रान्तः राजकर्मविनाशकृत्॥१४॥ अक्षक्रीडनकेनैव राजा सर्वहृतोऽभवत्। भग्नदेशस्ततो राजा स्वपुराद्विगतो वनम्॥१५॥ दमयन्त्याऽथ तत्र नानाक्लेशैश्च पीडितः। तत्पश्चात् दमयन्ती च वियोगं प्राप दैवतः॥१६॥ कस्मिंश्चिन्नगरे राजा भक्ष्यभावं समागतः॥ कस्मिंश्चिद्विषये भार्या कस्मिंश्चिद्विषये सुतः॥१७॥ भिक्षाशिनस्तु ते सर्वे नानाव्याधिप्रपीडिताः॥ स्वकर्मभोगान् भुंजानाः परस्परवियोगिनः॥१८॥ एकदा दमयन्ती सा शरभंगं महामुनिम्। प्रणम्य पादयोर्मूर्ध्ना बद्धाञ्जलिरभाषत॥१९॥ दमयन्त्युवाच—कथं भो मत्पतिप्राप्तिः पुत्रप्राप्तिः कथं भवेत्। कथं गजहयान् राज्यं नगरं नृपतिकुलं॥२०॥ कथमेतादृशं भार्या मुने तद्वद निश्चितम्। गणेश उवाच—इति तस्या वचः श्रुत्वा शरभंगोऽब्रवीत्तदा॥२१॥ शरभंग-उवाच—दमयन्ति शृणु वचो वक्ष्यामि हितकारकम्। महासंकष्टनाशनं सर्वकाम प्रदं शुभम्॥२२॥ भाद्रमासस्य या कृष्णचतुर्थी संकष्टा सा। तस्यां पूज्यो नरैः स्त्रीभिरेकदन्तो गजाननः॥२३॥ पूर्वोक्तेन विधानेन भक्त्या प्रीत्या च श्रद्धया व्रतेनानेन भो देवि लब्धकामा भविष्यसि॥२४॥ सप्तमासैर्महाराजमिति मे निश्चला मतिः। गणेश उवाच—दमयन्ती तदा चक्रे संकष्टव्रतमुत्तमम्। आद्ये मासि कृतारम्भा गणनाथार्चने रता॥२५॥ सप्तमासैः पतिं प्राप राज्यं पुत्रं तथैव च। तथैव सुपदं राजा कृत्वा चैव व्रतोत्तमम्॥२६॥ श्रीकृष्णउवाच—तदा पार्थ व्रतादस्माद्राज्यं प्राप्स्यसि निश्चितम्। वैरिगणस्ते पराभूता भविष्यन्ति विशेषतः॥२७॥ इति ते कथितं भूप व्रतानामुत्तमं व्रतम्॥ कर्त्तव्यं महाभागं सर्वदुःखनिवारणम्॥२८॥ इति श्रीस्कन्दपुराणे श्रीकृष्णयुधिष्ठिर संवादे भाद्रपदकृष्णचतुर्थीव्रतकथा समाप्ता॥२॥

[illegible]
[illegible] ।
[illegible]
[illegible] ।
मूलनक्षत्र
[illegible] मघा मूल के
[illegible] पिता को
[illegible] माता को । तीसरे
[illegible] । चौथा शुभ है।
[illegible]
[illegible]

पृथिवीसोना

५।२०।६।१२।१६।२६ पृ सोती है।

यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया दानाध्ययन कर्मसु ।

ग्रहों का स्नानसमय–

चन्द्र गुरु संध्या को । शनि का (अर्धरात्रि) दोपहर । मंगल दो घड़ी दिन चढ़े। राहू केतु आधीरात । सूर्य शुक्र का सूर्य उदय पर ।

शब्दो मेषे वृषे सिंहे मकरे च तथा तुले ।
अर्धशब्दो घटे कन्या शेषं शब्दं विवर्जयेत् ।
सिंह कन्या धने मीने कर्कटे च तथा तुले
अन्तरिक्षे भवेज्जन्म शेषौ भूमौ च जायते ।

राहू ३ केतु ६ उच्च का ।
[illegible] केतु ३ नीच का ।

पाया –
[illegible] से [illegible] नक्षत्र चांदी के पाये।
[illegible] नक्षत्र [illegible] के पाये।
रेवती से ३ सुवर्ण के पाये।
शेष लोहे के पाये।

बहुला व्रत की संक्षिप्त कथा—बहुला व्रत की कथा स्कन्द पुराण में श्रीकृष्ण युधिष्ठिरसंवाद प्रकरण में लिखी गई है। जिस कथा को श्री गणेश जी ने श्री पार्वतीजी को सुनाया था, उसी को भगवान् श्रीकृष्ण ने अर्जुन को शत्रुओं के नाश के लिए उपदेश दिया।

श्री गणेशजी ने कहा है कि हे भद्रे ! भाद्रपद मास में कृष्ण चतुर्थी के नाम से "संकटा चतुर्थी व्रत" है। सर्व सिद्धि दायिनी इस व्रत को करने से अनेकों फल प्राप्त होते हैं। सर्व प्रथम देवपूजन विधि के अनुसार पूजन करना चाहिए। पार्वती जी के पूछने पर श्री गणेश जी ने कहा कि गुरु उपदेशानुसार भक्ति पूर्वक व्रत को करे, और गणेश के इन बारह नामों (१ गणेश २ एकदन्त ३ कृष्णपिङ्ग ४ गजानन ५ लम्बोदर ६ भालचन्द्र ७ हेरम्ब ८ विकट ९ वक्रतुण्ड १० आखुरथ ११ विघ्नराज १२ गणाधिप) से पूजन करे और (तथा बारह मासों के कृष्ण चतुर्थी को भी व्रती क्रम से पूजन कर सकता है।) कथा सुनकर रात्रि में चन्द्रमा को अर्घ्य देवे।

कथा प्रारम्भ—कृत युग में नल नामक पुण्यश्लोक राजा थे, जिनकी परमरूपवती दमयन्ती नाम की स्त्री थी। दैववशात् उस राजा को अपनी स्त्री से वियोग हुआ। किन्तु स्त्री ने इसी व्रत द्वारा पति को प्राप्त किया। माता पार्वती ने, गणेश जी से पूछा, किस प्रकार दमयन्ती ने उस व्रत को करके तीसरे मास राजा को प्राप्त किया (श्रीकृष्ण जी अर्जुन से बोले कि हे पार्थ जिस प्रकार गणेश जी ने माता पार्वती को कथा सुनायी थी उसे सुनो)। गणेश जी ने कहा कि हे माता, राजा नल के ऊपर एक समय विपत्ति आ पड़ी। और एकाएक उनका सर्वस्व नष्ट हो गया। सर्व विनाश होने पर राजा स्त्री के साथ वन में चले गये और बहुत कष्ट झेले। एकाएक दम्पति के ऊपर वियोग दुःख भी आ पड़ा। राजा किसी नगर में भृत्य होकर जीवन बिताने लगे। उनकी स्त्री पुत्र भी पृथक् पृथक् रह कर भिक्षा वृत्ति से जीवन व्यतीत करने लगे। कुछ समय के बाद रानी दमयन्ती को शरभङ्ग मुनि का दर्शन मिला, मुनि के चरण पर गिर कर रानी ने पति और पुत्र की तथा धन धान्य की प्राप्ति के लिए उपाय पूछा। श्री गणेश जी बोले कि दमयन्ती के इस प्रश्न पर शरभङ्ग मुनि ने कहा कि भाद्रपद कृष्ण चतुर्थी के दिन गणेश व्रत है। उस दिन गणेश जी का पूजन करने से अपना मनः वाञ्छितः फलः प्राप्त होगा। गणेश जी बोले कि इस प्रकार उस व्रत को करके दमयन्ती अपने पति, पुत्र और राज्य सम्पत्ति सभी को प्राप्त कर सकी। भगवान् श्री कृष्ण ने राज्य प्राप्ति और शत्रु विनाश के लिए अर्जुन को इस व्रत का उपदेश दिया।

हरतालिका व्रत विधिः—मिट्टी का शिव पार्वती बनाकर कदली स्तम्भ से मण्डित चौकी पीढा या वेदी पर स्थापित करे—और सायंकाल में स्नानादि से पवित्र होकर कौशेय वस्त्र पहन कर जल अक्षत हाथ में लेकर सङ्कल्प करे देशकालौ संकीर्त्य अमुकगोत्रा अमुकप्रवरा अमुक नामाहम् सर्व पापक्षयपूर्वकसप्तजन्मसौभाग्यावधव्यपुत्रपौत्रादिसकलसमृद्धिपूर्वकशिवलोकप्राप्तिकामनयासोपवासहरि - तालिकाव्रतनिमित्तकं यथाशक्तिजागरणपूर्वकञ्च उमामहेश्वरपूजनं करिष्ये—हाथ में पुष्प लेकर बद्धाञ्जलि होकर ध्यान करे मन्त्र—मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय। दिव्याम्बरायै च दिगम्बराय नमःशिवायै च नमः शिवाय ॥१॥ अथ आवाहनम्। आगच्छ देवि सर्वेशे सर्वदेवैश्च संस्तुते। अतस्त्वां पूजयिष्यामि प्रसन्ना भव पार्वती ॥२॥ अथध्यानम्—शिवे-शिवप्रियेदेवि मङ्गले च जगन्मयि। शिवे कल्याणदे देवि शिवरूपे नमोऽस्तुते ॥३॥ अथपाद्यम्। शिवरूपे नमस्तेऽस्तु शिवायै सततं नमः। शिवप्रियेयुता नित्यं पाद्यं मे प्रतिगृह्यताम् ॥४॥ अथार्घ्यम्। संसारतापविच्छेदं कुरु मे सिंहवाहिनि। सर्वकामप्रदे देवि अर्घ्यं मे प्रतिगृह्यताम् ॥५॥ अथाचमनम्। राज्यसौभाग्यदे देवि प्रसन्नाभव पार्वति। मन्त्रेणानेन देवि त्वं पूजितासिमहेश्वरि ॥६॥ लोकानां तुष्टि-कर्त्रीत्वं मुक्तिदा च सदा नृणाम्। वाञ्छितं देहि मे नित्यं दुरितं च विनाशय ॥७॥ ततः पञ्चामृत स्नानम्—पञ्चनद्यः सरस्वती मपिवन्ति सस्रोतसः। सरस्वतीतु पञ्चधा स देशोऽभवत्सरित् ॥८॥ अथ-वस्त्रम्—वस्त्र युग्मं गृहाणेदं देवि देवस्य वल्लभे। सर्वसिद्धिप्रदे देवि मङ्गलं कुरुमेसदा ॥९॥ अथचन्दनम्-चन्दनेन सुगन्धेन कर्पूरागुरुकुङ्कुमैः। लेपय सर्वगात्राणि प्रीयतांच हरप्रिये ॥१०॥ अथाक्षतान्—रञ्जितां कुङ्कुमेनैव अक्षतैश्च सुशोभनैः। पूजयद् विधिना देवीं सुप्रसन्नाञ्च पार्वतीम् ॥११॥ अथ-पुष्पम्—माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो। मयादत्तानि पूजार्थं गृहाण परमेश्वरि ॥१२॥ अथ धूपम्—चन्दनागुरुकस्तूरीकुंकुमाढ्यो मनोहरः। भक्त्या दत्तो मयादेवि धूपोऽयं प्रतिगृह्यताम् ॥१३॥ अथदीपम्—त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम्। आत्मज्योतिः परध्यानं दीपोऽयं प्रतिगृह्यताम् ॥१४॥ अथनैवेद्यम्। नैवेद्यं गृह्यतां देवि भक्ति मे निश्चलां कुरु। ईप्सितं च वरं देहि परत्र-चपरांगतिम् ॥१५॥ अथफलम्—इदं फलं मयादेवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवे-ज्जन्मनिजन्मनि ॥१६॥ अथताम्बूलम्—पूगीफलंमहादिव्यं नागवल्लीदलैर्युतम्। कर्पूरेण समायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥१७॥ अथप्रार्थना—सौभाग्यञ्चाप्यवैधव्यं पुत्रपौत्रादिकं सुखम्। बहुपुण्यफलं सर्वं ततः शान्तिं च देहिमे ॥१८॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदीश्वरि। पूजितासि महादेवि सम्पूर्णञ्च तदस्तुमे। इति पूजाविधि समाप्तः।

श्री गणेशायनमः ॥ अथ हरितालिकाव्रतकथा श्रवणंकुर्यात्। तद्यथा—मंदारमालाकुलिताल—कायै कपालमलांकितशेखराय। दिव्याम्बरायै च दिगंबराय नमः शिवायै च नमः शिवाय ॥१॥ कैलाशशिखरेरम्ये गौरी पृच्छति शंकरम् ॥ गुह्याद्गुह्यतरंगुह्यं कथयस्व महेश्वर ॥२॥ सर्वेषां सर्व धर्माणामल्पायासं महत्फलम्। प्रसन्नोऽसि यदानाथ तथ्यब्रूहि ममाग्रतः ॥३॥ केनत्वं हि मया-प्राप्तस्तपोदानव्रतादिना। अनादिमध्यनिधनोभर्ताचैव जगत्प्रभुः ॥४॥ ईश्वरउवाच ॥ श्रृणुदेवि-प्रवक्ष्यामि तवाग्रे व्रतमुत्तमम्। यद्गोप्यं ममसर्वस्वं कथयामि तव प्रिये ॥५॥ यथा चोडुगणेचन्द्रो-ग्रहणां भानुरेव च। वर्णानां च यथा विप्रो देवानां विष्णुरेव च ॥६॥ नदीनां च यथा गंगा पुराणानां च भारतम्। वेदानां च यथा साम इन्द्रियाणांमनो यथा ॥७॥ पुराणवेदसर्वस्वं आगमे च यथोदितम्। एकाग्रेण श्रृणुष्वैतद्यथा दृष्टं पुराव्रतम् ॥८॥ येन व्रतभावेण प्राप्तमर्द्धासनं मम। तत्सर्वं कथयिष्येऽहं त्वं मम प्रेयसी यतः ॥९॥ भाद्रेमासि सितेपक्षे तृतीयाहस्तसंयुते। तदनुष्ठानमात्रेण सर्व-पापात्प्रमुच्यते ॥१०॥ श्रुणुदेवि त्वया पूर्वं यद्व्रत चरितं महत्। तत्सर्वं कथयिष्यामि यथावृतं हिमालये ॥११॥ पार्वत्युवाच—कथं कृतं मयानाथ व्रतानामुत्तमं व्रतम्। तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर ॥१२॥ शिवउवाच—अस्तितत्र महान्दिव्यो हिमवान्वै नगेश्वरः। नाना भूमिसमाकीर्णो नानाद्रुमसमाकुलः ॥१३॥ नानापक्षिसमायुक्तो नानामृगविचित्रितः। यत्रदेवाः सगन्धर्वाः सिद्धचारणगुह्यकाः ॥१४॥ विचरन्ति सदा हृष्टा गन्धर्वाः गीततत्पराः। स्फटिकैः काञ्चन-श्रृंगं मणिवैदूर्यभूषितम् ॥१५॥ भुजैर्लिखन्निवाकाशं सुहृदो मंदिरं यथा। हिमेन पूरितं सर्वं गंगाध्वनि निनादितम् ॥१६॥ पार्वति त्वं यथावाल्ये परमाचरती तपः। अब्दद्वादशकं देवि धूम्रपाना अधोमुखी ॥१७॥ संवत्सरचतु षष्टि पक्वपर्णाशनंकृतम्। माघमासे जले मग्ना वैशाखे चाग्निसेविनी ॥१८॥ श्रावणे च वहिर्वासा अन्नपानविवर्जिता। दृष्ट्वा तातेन तत्कष्टं चिन्तया दुःखितोऽभवत् ॥१९॥ कस्मै देया मया कन्या एवं चितातुरोऽभवत्। तदैवावसरे प्राप्तो ब्रह्मपुत्रस्तु धर्मवित् ॥२०॥ नारदो मुनिशार्दूलः शैलपुत्रीदिदृक्षया। दत्त्वार्घ्यं विष्टरं पाद्यं नारदं प्रोक्तवान् गिरिः ॥२१॥ हिमवानुवाच ॥ किमर्थमागतः स्वामिन् वदस्व मुनिसत्तम। महाभाग्येन संप्राप्तः त्वदागमनमुत्तमम् ॥२२॥ नारदउवाच—श्रृणुशैलेन्द्र मद्वाक्यं विष्णुना प्रेषितोऽस्म्यहम्। योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया ॥२३॥ वासुदेव समो नास्ति ब्रह्मशक्रशिवादिषु। तस्माद्देया त्वया कन्या अस्मार्थं सम्मतं मम ॥२४॥ हिमवानुवाच—वासुदेवः स्वयंदेवः कन्यां प्रार्थयते यदि। तदा मया प्रदातव्या त्वदागमन-गौरवात् ॥२५॥ इत्येवं कथितं श्रुत्वानभस्यन्तर्दधे मुनिः। ययौ पीताम्बरधरं शंखचक्रगदाभृतम् ॥२६॥ कृताञ्जलिपुटो भूत्वा मुनीन्द्रस्तमभाषत ॥ नारदउवाच—श्रृणुदेवभवत्कार्यं विवाहो निश्चितस्तव ॥२७॥ हिमवांस्तु ततो गौरीमुवाच वचनं मुदा। दत्तासि त्वं मया पुत्रि देवेत्वं गरुड-ध्वजे ॥२८॥ श्रुत्वा वाक्यं पितुर्देवि गता च सखिमन्दिरम्। भूमौ पतित्वा सा तत्र विललापाति दुःखिता ॥२९॥ विलपन्तीतदा दृष्टवा सखीवचनमब्रवीत् ॥ सख्युवाच—किमर्थं दुःखिता देवि कथयस्व ममाग्रतः ॥३०॥ यद्भावत्याभिलषितं करिष्येऽहं न संशयः। पार्वत्युवाच—सखि श्रृणु ममप्रीत्यामनोऽभिलषितं मम ॥३१॥ महादेवं च भर्तारं करिष्येऽहं न संशयः। एतन्मे चिन्तितं कार्यं तातेन कृतमन्यथा ॥३२॥ तस्माद्देहपरित्यागं करिष्येऽहं न संशयः पार्वत्या वचनं श्रुत्वा सखी-वचनमब्रवीत् ॥३३॥ सख्युवाच—पितायत्र न जानाति गमिष्यामि हि तद्वनम्। इत्येवं संमतं कृत्वा नीतासि त्वं महद्वनम् ॥३४॥ पिता निरीक्षयामास हिमवांस्तु गृहेगृहे। केन नीता भ मे पुत्री देव-दानव किन्नरः ॥३५॥ नारदाग्रे कृतं सत्यं किं दास्ये गरुडध्वजे। इत्येवं चिन्तयाविष्टः मूर्छितो निपपात ह ॥३६॥ हाहा कृत्वा प्रधावन्तो लोकास्ते गिरिपुङ्गवम्। ऊचुर्गिरिवरं सर्वे मूर्छाहेतुं गिरे वद ॥३७॥ गिरिरुवाच—दुःखस्य हेतु श्रृणुत कन्यारत्नं हृतं मम। दष्टा वा कालसर्पेण सिंहव्याघ्रे-णवाहता ॥३८॥ नजाने क्वगता पुत्री केन दुष्टेन वा हृता। चकम्पे शोकसंतप्तो वातेनेव महातरुः ॥३९॥ गिरिर्वनाद्वनंयातस्त्वदालोकनकारणात्। सिंहव्याघ्रैश्च भल्लैश्च रोहिभिश्च महावनम् ॥४०॥ त्वं चापि विपिन घोरे व्रजन्ती सखिभिःसह। तत्र दृष्ट्वा नदींरम्यांतत्तीरे च महागुहाम् ॥४१॥ तां प्रविश्य सखीसार्धमन्नभोगविवर्जिता। संस्थाप्य वालुकालिङ्गं पार्वत्या सहितं मम ॥४२॥ भाद्रशुक्लतृतीयानां त्वमर्चन्तीतु तस्तभे। तत्र वादनगीतेन रात्रौ जागरणं कृतम् ॥४३॥ व्रतराजप्रभावेण आसनं चलितं मम ॥ सम्प्राप्तोऽहं तदातत्र यत्रत्वं सखिभिः सह ॥४४॥ प्रसन्नोऽस्मि मया प्रोक्तं वरं ब्रूहि वरानने ॥ पार्वत्युवाच ॥ यदि देव प्रसन्नोऽसिभर्ता भव महेश्वर ॥४५॥ तथे-त्युक्त्वा तु संप्राप्तः कैलासं पुनरेव च। ततः प्रभाते प्रतिमां नद्यां कृत्वा विसर्जनम् ॥४६॥ पारणं तु कृतं तत्र सख्या सार्द्धंत्वया शुभे। हिमवानपि तं देशमाजगाम वनाद्वनम् ॥४७॥ चतुराशा निरीक्षंस्तु विकल पतितो भुवि। दृष्ट्वा तत्र नदीतीरे प्रसुप्तं कन्यकाद्वयम् ॥४८॥ उत्थाप्योत्संगमारोप्य-रोदनं कृतवान् गिरिः। सिंहव्याघ्रादिभिर्युक्तं किमर्थं वनमागता ॥४९॥ पार्वत्युवाच—श्रृणु तात मया पूर्वं दत्तःस्वात्वामातुशंकरे ॥ तदन्यथाकृतं तात तेनाहंवनमागता ॥५०॥ तथेत्युक्त्वा हिमवती नीतासित्वं गृहं प्रति। यथा प्रयुक्तमस्मार्कं कृत्वा वैवाहिकीं क्रियाम् ॥५१॥ तेन व्रतप्रभावेण प्राप्तमर्धासनं प्रिये। तदादि व्रतराजं तु कस्याग्रे न न्यवेदयम ॥५२॥ व्रतराजस्यनामेदं श्रृणुदेवि यथाभवत्। अलिभिर्हरिता यस्मात्तस्मात्सा हरितालिका ॥५३॥ पार्वत्युवाच ॥ नामेदं कथितं नाथ विधिवद् च मे प्रभो। किं पुण्यं किं फलं चास्य केन वाद्क्रियतेव्रतम् ॥५४॥ ईश्वरउवाच ॥ श्रृणुदेवि विधिर्वक्ष्ये नारीणांव्रत मुत्तमम्। कर्तव्यंतु प्रयत्येन यदि सौभाग्य मिच्छति ॥५५॥ तोरणादि प्रकर्तव्यं कदलीस्तंभमंडितम्। आच्छाद्य पटवस्त्रेणनानावर्णं विचित्रितम् ॥५६॥ चन्दनेन सुगन्धेन लेपयद् गृहमण्डपम्। शंखभेरीमृदंगांश्च वादयेद् बहुभिर्जनैः ॥५७॥ नानामंगलसंचारं कर्तव्यं यम सद्मनि। स्थापयेत्प्रतिमां तत्र पार्वत्या सहितं मम ॥५८॥ पूजयेद्बहुभिः पुष्पैगन्धधूपैर्मनोहरैः। नाना प्रकारनैवेद्यैः रुपोष्य जागरणं निशि ॥५९॥ नारिकेलैः पूगफलैर्जंवीरैः सलवंगकैः। वीजपूरैस्तु नारंगैः फलैरन्यैर्वेर्चाविशेषतः ॥६०॥ ऋतुदेशोद्भवैश्चैव फलैश्च कुसुमैरपि। धूपदीपादिभिश्चैव मंत्रेणानेन पूजयेत् ॥६१॥ शिवायै शिवरूपिण्यै मंगलायै महेश्वरि। शिवेसर्वार्थदे देवि शिवरूपे नमोऽस्तुते ॥६२॥ शिवरूपेनमस्तुभ्यं शिवाय सततं नमः। नमस्ते ब्रह्मरूपिण्यै जगद्धात्र्यै नमोनमः ॥६३॥ संसारभयसंत्रस्तांत्राहि मांसिंहवाहिनि। येन कामेन भोदेवि पूजितासि महेश्वरि ॥६४॥ राज्यं सौभाग्यंमेदेहि प्रसन्नाभवः पार्वति। मन्त्रैणानेन भोदेवि पूजयेदुमयासह ॥६५॥ कथां श्रुत्वा विधानेन दद्याद्वस्त्रादिकं तथा। ब्राह्मणाय प्रदातव्यं वस्त्रधेनुहिरण्यकम् ॥६६॥ कृत्यैवं चैकचित्तेन दम्पति-भ्यासहैवतु ॥ संकल्पास्तु ततः कुर्याद्वस्त्र रत्नादिकं च यत् ॥६७॥ एवं या कुरुते देवि सर्वपापैः प्रमुच्यते। सप्त जन्म भवेद्राज्यं सौभाग्यं सुखदायकम् ॥६८॥ तृतीयायां तु या नारी अन्नाहारं समाचरेत्। सप्त-जन्म भवेद्वन्ध्या वैधव्यं च पुनः पुनः ॥६९॥ दारिद्र्यपुत्रशोकश्च कर्कशादुःखभागिनी। सा पतिता नरके घोरे नोपवासं करोति या ॥७०॥ अन्नाहारात् शूकरीस्यात् फलभक्षेण मर्कटी ॥ जलौका जलपानेन क्षीराहारेण सर्पिणी ॥७१॥ मांसाहारद्भवेद्व्याघ्री मार्जारी दधिभाक्षणात्। मिष्टानात् पिपीलिका जन्म मक्षिका सर्वभक्षणात् ॥७२॥ निद्रावशेनाजगरी कुक्कुटी पतिवंचनात्। तस्मात्सर्वं प्रयत्नेन-अंतकुर्युः सदास्त्रियः ॥७३॥ कांचनं राजतं ताम्रं तथा वंशस्य भाजनम्। दापयेदन्नं विप्राय पारण-तदनन्तरं ॥७४॥ एव विधिं या कुरुते च नारी मयानिभं सा लभते च स्वामिनम्। विनाशकाले तव तुल्यरूपं सायुज्यामुक्तिलभते च भुक्तिम् ॥७५॥ अश्वमेधसहस्त्राणि वाजपेयशतानि च। कथाश्रवणमात्रेण तत्फलं प्राप्यतेनरैः ॥७६॥ एतत्ते कथितं देवि व्रतानानां व्रतमुत्तमम्। यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥७७॥ इति लिङ्ग पुराणे हरितालिकाव्रतकथा समाप्ता ॥

हरितालिका व्रत की संक्षिप्त कथा—हरितालिका व्रत की कथा लिङ्ग पुराण से उद्धृत है। इस कथा को श्री शिवजी ने पार्वती जी के विशेष आग्रह पर उन्हें सुनाया था। एक बार कैलाश पर्वत के शिखर पर बैठे हुए शिव जी से पार्वती जी ने कहा कि हे नाथ ? यदि आप मुझ पर प्रसन्न हैं तो अत्यन्त गोप्य से गोप्य व्रत को, जो अत्यन्त फलदायक हो उसे सुनाइये। भगवान् शङ्कर बोले मैं उस गोपनीय तथा फलदायक व्रत को बतलाता हूँ, मन को एकाग्र करके सुनो। भाद्रपद शुक्ल तृतीया के दिन हस्त नक्षत्र के होने पर इस व्रत को करने से पाप नष्ट हो जाते हैं। इसी व्रत को तुमने पहले किया था। उसी व्रत को बतला रहा हूँ। श्री पार्वती जी ने पूछा कि किस व्रत को मैंने किया था ? शिव जी बोले पर्वतों के राजा हिमवान हैं, जहाँ पर गन्धर्व, सिद्ध चारण, गुह्यक आदि का निवास है। वहीं पर तुमने अपने बाल्यकाल में कठिन तप किया था। तुम्हारी कठिन तपस्या को देखकर तुम्हारे पिता हिमवान को यह चिन्ता हुई कि किसे इस कन्या को प्रदान करूँ। उसी समय श्री नारद जी वहाँ पधारे। उनके यथोचित सत्कार के पश्चात् हिमवान ने पूछा कि हे नाथ! आप किस लिये पधारे हैं ? श्री नारद जी ने कहा कि मैं श्री वासुदेव द्वारा भेजा गया आपके पास आया हूँ। उनका कहना है, कि योग्य वर को ही कन्या देना उचित है, अतः उनके अतिरिक्त दूसरा कौन योग्य है ? वह सर्व श्रेष्ठ हैं। श्री हिमवान ने उत्तर दिया कि विष्णु भगवान् को अपनी कन्या देना मुझे स्वीकार है। इसके बाद नारद जी ने विष्णु लोक में जाकर विष्णु भगवान से यह वृत्तान्त सुनाया। श्री हिमवान ने गौरी से कहा कि पुत्री ! तुम्हें मैं विष्णु को दान करना चाहता हूँ। पिता की बात सुनकर रोती हुई गौरी सखी के पास पहुँची और पृथ्वी पर गिर पड़ी। सखी ने पूछा कि इस प्रकार क्यों रो रही हो ? पार्वती ने कहा कि श्री शिव जी ही हमारे अभीष्ट देव हैं और पिता जी ने मुझे श्री विष्णु भगवान को प्रदान करने का वचन दिया है। अतः मैं इस शरीर को छोड़ देना चाहती हूँ। सखी ने पार्वती को उस वन में पहुँचा दिया जिस बन को हिमवान नहीं जानते थे। इस प्रकार पार्वती के लुप्त हो जाने पर हिमवान को बहुत दुःख हुआ और वह मूर्छित हो गये। उन्हें विष्णु को कन्या दान करने की बात जब स्मरण हो जाती तो और कष्ट होने लगता था। पार्वती को उन्होंने सभी स्थानों में ढुढ़वाया। सभी बड़े बड़े पर्वत आकर राजा के मूर्छा का कारण पूछने लगे, सबसे उन्होंने पार्वती हरण की बात कही। शिवजी बोले कि हे पार्वती तुम सखी के साथ भयानक घोर जंगलों में होते हुए एक रम्य नदी तट पर पहुँची, और वहाँ एक पर्वत गुहा में प्रविष्ट होकर सम्पूर्ण भोगों को छोड़ कर, भाद्र शुक्ल तृतीया के दिन हस्त नक्षत्र होने पर तुमने पार्वती के सहित बालू का लिङ्ग स्थापित करके वाद्य और गीत के साथ मेरी पूजा की, रात्रि में जागरण भी की। उस व्रत के प्रभाव से मेरा आसन चलित हो गया। सखी के साथ तुम्हें मेरा दर्शन हुआ। मैंने कहा कि वर मांगों, और तुमने मुझे वर रूप में याचना किया। मैंने "तथास्तु" कहा और तुमने दूसरे दिन प्रातःकाल प्रतिमा का विसर्जन किया। उसी समय बन में ढूढ़ते हिमवान वहाँ पहुँच गये और तुम्हें देख प्रसन्न होकर गोदी में बैठाकर घनघोर जंगल में आने का कारण पूछा, तब तुमने पूर्व जन्म के वृतान्त को उनसे बतला कर मुझे पति रूप में पाने की बात बतलाया प्रसन्न होकर हिमवान ने घर पहुँच विवाह विधि को सम्पन्न किया। उस व्रत के प्रभाव से तुमने मेरे आधे आसन को प्राप्त किया इसके बाद पार्वती जी ने शिव जी से व्रत के विधि विधान को पूछा। श्री शिव जी ने कहा कि यह स्त्रियों का व्रत है। व्रत के दिन तोरणादि से स्थान को सजा कर सुगन्धित द्रव्यों से युक्त गृह मण्डप में वाद्य गीत के साथ पार्वती सहित मेरी प्रतिमा को स्थापित करना चाहिये। पश्चात् उक्त पूजन विधि से पूजा करके शिव पार्वती की स्तुति करना चाहिये। हे देवि ! जो स्त्री इस व्रत को करती है वह पापों से छुटकारा पाकर मन वाञ्छित फल प्राप्त करती है। तथा जो स्त्री उस दिन अन्न ग्रहण करती हैं उन्हें जन्म जन्मान्तर वैधव्य भोगना पड़ता है। "हरितालिका व्रत" कथा को सुनने मात्र से हजारों अश्वमेध यज्ञ और सैकड़ों "वाजपेय यज्ञ" करने का फल प्राप्त होता है। इस लिये हे देवि ? इस उत्तमोत्तम व्रत को मैंने तुम्हें बतलाया। जो स्त्री इस व्रत को करेगी वह सभी पापों से छुटकारा पाकर इष्टफल को प्राप्त करेगी इसमें संशय नहीं है।

"अनन्तव्रतकथा ॥" सूत उवाच। पुरा तु जाह्नवीतीरे धर्मो धर्मपराक्रम। जरासन्धवधार्थाय राजसूयमकल्पयत् ॥१॥ कृष्णेन सह धर्मोऽसौ भीमार्जुनसमन्वितः। यज्ञशालां प्रकुर्वीत नानारत्नोप-शोभिताम् ॥२॥ मुक्ताफलसमाकीर्णां महेन्द्रालयसन्निभाम्। यज्ञार्थं भूपतीन्सर्वान् समानीय प्रयत्नतः ॥३॥ गान्धारीतनयो राजा चैकदा नृपनन्दनः। दुर्योधन इति ख्यातः समागत्य मखालयम् ॥४॥ दृष्ट्वा दुर्योधनस्तत्र प्राङ्गणं जलसन्निभम्। ऊर्ध्वं कृत्वा तु वस्त्राणि तत्र गच्छन् शनैः शनैः ॥५॥ दुर्योधनस्ततो गच्छञ्जलमध्ये पपातह ॥६॥ स्मितवक्त्रास्तु तं दृष्ट्वा द्रौपद्यादिवराङ्गनाः। उपहासं च चक्रुस्ता द्रौपद्यादिसुलोचनाः ॥७॥ महाराजा-पुनः सर्वं नृपास्तत्रैव कृष्णश्च तपोधनाः।

विराजोऽसौमहाक्रोध परायणः । विनिर्गतः स्वकं राष्ट्रं मातुलेनवृतो नृपः ॥८॥ तस्मिन्काले तु शकुनिः प्रोवाच मधुरं वचः । मुञ्च राजन्महारोषं पुरतः कार्यगौरवात् ॥९॥ गन्तुमुत्तिष्ठ राजेन्द्र सत्रात्स्वसदनं प्रति । तथेत्युक्त्वा महाराजः समागत्य मखालयात् ॥१०॥ निरागच्छन्नृपाः सर्वे त्यक्त्वा यज्ञं स्वराष्ट्रकम् ॥ दुर्योधनो राजभिश्च समागत्यगजाह्वयम् ॥११॥ आनीय पाण्डुपुत्रांस्तान्धर्मभीमार्जुनान् वरान् । द्यूतारम्भमकुर्त्त स्वं राज्यं प्राप्तवांस्ततः ॥१२॥ द्यूतेनैव जितास्सर्वे पाण्डवा वीतकल्मषाः । ततोऽरण्यान्तरेगत्वा वर्तन्ते वनचारिणः ॥१३॥ ततोवृतान्तमापन्नो भ्रातृभिः सह पाण्डवम् । युधिष्ठिरं द्रष्टुमनाः कृष्णोऽगाज्जगदीश्वरः ॥१४॥ सूतउवाच ॥ अरण्येवर्तमानास्ते पाण्डवाः दुःखकर्शिताः । कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥१५॥ युधिष्ठिर उवाच ॥ अहं दुःखीह संजातो भ्रातृभिः परिवारितः । कथं मुक्तिर्वदास्माकमनन्ताद्दुःखसागरात् ॥१६॥ कं देवं पूजयिष्यामि राज्यंप्राप्स्याम्यनुत्तमम् । अधुना किं व्रतं कृत्वा त्वत्प्रसादाद्भवेद्धितम् ॥१७॥ श्रीकृष्ण उवाच ॥ अनन्तव्रतमस्त्येकं तिथावस्यामनुत्तमम् । सर्वपापहरं नृणांस्त्रीणांचैव युधिष्ठिर ॥१८॥ शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत् । तस्यानुष्ठानमात्रेण सर्वपापं व्यपोहति ॥१९॥ युधिष्ठिर उवाच — कृष्ण ! कोऽयमनन्तेति प्रोच्यते यस्त्वयाविभो । किं शेषनाग आहोस्विदनन्तस्तक्षकः स्मृतः ॥२०॥ परमात्माऽथवाऽनन्त उताहो ब्रह्म गीयते ॥ एषोऽनन्त संज्ञोवै तथ्यं मे ब्रूहि केशव ॥२१॥ श्रीकृष्ण उवाच — अनन्त इत्यहं पार्थ मम रूपं निबोधय । आदित्यादिग्रहात्मासौ यः काल इति पठ्यते ॥२२॥ कलाकाष्ठामुहूर्तादि दिवारात्रिशरीरवान् । पक्षमासर्तुवर्षाणि युगकालव्यवस्थया ॥२३॥ योऽयं कालो मयाख्यातः सोऽनन्त इति कीर्त्यते । सोऽहं कृष्णोऽवतीर्णोऽत्र भूभारोत्तारणाय च ॥२४॥ दानवानां वधार्थाय वासुदेवकुलोद्भवम् । मां विद्धि सततं पार्थ साधूनां पालनाय च ॥२५॥ अनादिमध्यनिधनं कृष्णं विष्णुं हरिं शिवम् । वैकुण्ठं भास्करं सोमं सर्वव्यापिनमीश्वरम् ॥२६॥ विश्वरूपं महाबाहो योगिध्येयमनुत्तमम् । सर्वरूपमनन्तं च यस्मिन्निन्द्राश्चतुर्दश ॥२७॥ वसवो द्वादशादित्या रुद्रा एकादशस्मृताः । सप्तर्षयः समुद्राश्च पर्वताः सरितांद्रुमाः ॥२८॥ नक्षत्राणि दिशोभूमिः पाताल भूर्भुवादिकम् । माकुरुस्वात्रसन्देहं सोऽहं पार्थं न संशयः ॥२९॥ युधिष्ठिर उवाच । अनन्तव्रत माहात्म्यं विधिर्वेदविदाम्बर । किं पुण्यं किं फलं चास्य किं दानं कस्य पूजनम् ॥३०॥ केन चादौपुरा चीर्णं मर्त्ये केन प्रकाशितम् । एवं सविस्तरं सर्वं ब्रूह्यनन्तव्रतं मम ॥३१॥ श्रीकृष्ण उवाच । आसीत्पुराकृतयुगे सुमन्तुर्नामवैद्विजः । वशिष्ठगोत्रसम्भूतां सुरूपां च भृगोः सुताम् ॥३२॥ दीक्षानाम्नीं चोपयेमेवेदोक्तविधिनानृपः । तस्याः कालेन सञ्जातादुहिताऽनन्तलक्षणा ॥३३ शीलानाम्नी सुशीला सा वर्धते पितृवेश्मनि । माता च तस्याः कालेन ज्वरदाहेन पीड़िता ॥३४॥ विनष्टा सा नदी तोये ययौ स्वर्गं पतिव्रता । सुमन्तुस्तु ततोऽन्यांवै धर्मपुंसः सुतां पुनः ॥३५॥ उपयेमे विधानेन दुःशीला नामनामतः । दुःशीलां कर्कशां चण्डीं नित्यं कलहकारिणीम् ॥३६॥ सापि शीला पितुर्गेहे गृहार्चन परावभौ । कुड्यस्तम्भ बहिर्द्वार देहलीतोरणादिषु ॥३७॥ वर्णकैश्चित्रमकरोन्नीलपीत सितासितैः । स्वस्तिकैः शंख पद्मैश्च भावयन्ती पुनः पुनः ॥३८॥ ततः काले बहुगते कौमारवयवर्तिनी । एवं सा वर्धतेशीला पितृवेश्मनि मङ्गला ॥३९॥ तां दृष्ट्वा चिन्तयामास वराननुगुणान्भुवि । कस्मै देया मया कन्या विचार्येति सुदुःखितः ॥४०॥ एतस्मिन्नेवकालेतु मुनिर्वेदविदांवरः । कन्यार्थी चागतः श्रीमान् कौण्डिन्योमुनि सत्तमः ॥४१॥ उवाचरूपसंपन्नां त्वदीयां तनयां वृणे । पिता ददौ द्विजेन्द्राय कौडिन्याय शुभेदिने ॥४२॥ गृह्योक्तविधिना पार्थ विवाहमकरोत्तदा । मङ्गलाचार निर्वर्त्योद्वाहिकं निर्घोषं तत्र कुर्वन्ति योषितः ॥४३॥ ब्राह्मणाः स्वस्तिवचनं जयघोषं च वन्दिनः । पारितोषिकम् सर्वं प्रोक्तवान् कर्कशांद्विज ॥४४॥ सुमन्तुरुवाच — किञ्चिद्दायादिकं देयं जामातुः पारितोषिकम् । उवाच तच्छ्रुत्वा कर्कशा क्रुद्धा प्रोत्सार्या गृहमण्डनम् ॥४५॥ पेटकेसुस्थिरं बद्ध्वा स्वगृहे गम्यतामिति । भोज्यवित्तं नैवास्ति गृहे पश्य यदि स्थितम् ॥४६॥ तच्छ्रुत्वा विमनाः पार्थ संयतात्मा मुनिस्तदा । शनैः शनैः । शीला वशिष्ठचूर्णेन पाथेयं च चकार सा ॥४७॥ कौण्डिन्योऽपि विवाह्यैनां पथि गच्छन् शनैः शनैः । संस्थाप्यावश्यकं सुमन्तोरादाय नवोढां गोरथेन हि ॥४८॥ ददर्श यमुनां पुण्यां तामुत्तीर्यतटं रथम् । ददर्श शीला सा स्त्रीणां कर्त्तुं गतः शिष्यान्नियुज्यवै ॥४९॥ मध्याह्ने भोज्यवेलायां समुत्तीर्यसरित्तटे । उपगम्य शनैः शीला पप्रच्छ समूहं रक्तवाससाम ॥५०॥ चतुर्दश्यामर्चयन्तं भक्त्यादेवं जनार्दनम् । उपगम्य शनैः शीला पप्रच्छ स्त्रीकदम्बकम् ॥५१॥ आर्याः किमेतन्मे ब्रूत किन्नाम व्रतमीदृशम् । ता ऊचुर्योषितस्तास्तु शीलां शील विभूषणाम् ॥५२॥ अनन्तव्रत मेतद्दिह अनन्तस्त्वत्र पूज्यते । सोऽब्रवीदहमप्येतत्करिष्ये व्रतमुत्तमम् ॥५३॥ विधानं कीदृशं तत्र किं दानं कोऽत्र पूज्यते ॥५४॥ स्त्रियः ऊचुः — शीले सदन्नप्रस्थस्य पुन्नाम्ना संस्कृतस्य च । अर्धं विप्रायदातव्यमर्धमात्मनि भोजनम् । शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः । कर्तव्यं च सरित्तीरे कथां श्रुत्वा हरेरिमाम् ॥५६॥ शेषं कुशमयं कृत्वा वंशपात्रे निधाय च । स्नात्वाऽनन्तं समभ्यर्च्य मण्डले गन्ध दीपकैः ॥५७॥ पुष्पैर्धूपैश्च नैवेद्यैर्नानापक्वान्न संयुतैः । तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुदोरकम् । चतुर्दशग्रन्थियुतं वामे करतलेन्यसेत् ॥५८॥ धारण मन्त्रः— अनन्त संसार महासमुद्रे मग्नं समभ्युद्धर वासुदेव । अनन्तरूपे विनियोज यस्व ह्यनन्तसूत्राय नमोनमस्ते ॥५९॥ अनन्तं च करे बद्ध्वा भोक्तव्यं स्वस्थमानसैः ॥ ध्यात्वा नारायणं देवमनन्तं विश्वरूपिणम् ॥६०॥ भुक्त्वा चान्तेव्रजेद्वेश्म भद्रे प्रोक्तं व्रतं तव ॥ श्रीकृष्णउवाच एवमाकर्ण्यराजेन्द्र प्रहृष्टेनान्तरात्मना ॥६१॥ सापिचक्रे व्रतं शीला करे बध्वा सुदोरकम् । चतुर्दश ग्रन्थियुतं वामे बाहौ यथोदितम् । पाथेयमर्धं विप्रायदत्वा भुक्त्वा स्वयं ततः ॥६२॥ पुनर्जगाम संहृष्टा गोरथेन स्वकं गृहम् । भर्त्रा सहैव शकुनप्रत्ययस्तत्क्षणादभूत् ॥६३॥ तेनानंतव्रतेनास्य बभौ गोधनसंकुलम् । गृहाश्रमं श्रियाजुष्टं धनधान्य समन्वितम् ॥६४॥ आकुलं व्याकुलं रम्यं सर्वदाऽतिथिपूजनैः । सापि माणिक्यकाञ्चिभिर्मुक्ताहारैर्विभूषिता ॥६५॥ दिव्याङ्गवस्त्रसच्छन्ना सावित्रीप्रतिमाऽभवत् । विचचार गृहेभर्तुः समीपे सुखरूपिणी ॥६६॥ कदाचिदुपविष्टाया दृष्टो बद्धः सुदोरकः । शीलाया हस्तमूले तु भर्त्रा तस्या द्विजन्मना ॥६७॥ किमिदं दोरकं शीले ममवश्याय कल्पितम् । धृतं सुदोरकंत्वेतत् किमर्थं ब्रूहि तत्वतः ॥६८॥ यस्य प्रसादात्सकला धनधान्यादि सम्पदः । लभ्यन्ते मानवैश्चापि सोऽनन्तोऽयं मयाधृतः ॥६९॥ शीलायास्तद्वचः श्रुत्वा भर्त्रातिन द्विजन्मना । श्रीमदान्धेन कौरव्य साक्षेपं त्रोटितस्तदा ॥७०॥ कोऽनन्त इति मूढेन जल्पता पापकारिणा । क्षिप्तोज्वालाकुले वह्नौ हाहाकृत्वा प्रधावती ॥७१॥ शीला गृहीत्वां तत्सूत्रं क्षीरमध्ये समाक्षिपत् । तेन कर्म विपाकेन सा श्रीस्तस्यक्षयंगता ॥७२॥ गोधनं तस्करैर्नीतं गृहं, दग्धं धनं गतम् । यद्यथैवागतं गेहे तत्तथैव पुनर्गतम् ॥७३॥ स्वजनैः कलहोनित्यं बन्धुभिस्ताडनंतथा । अनन्तक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥७४॥ न कश्चिद्वदते लोकोतेन सार्द्धंयुधिष्ठिर । शरीरेणातिसन्तप्तो मनसाऽप्यतिदुःखितः ॥७५॥ विपदं परमां प्राप्तः कौडिन्यः प्राह तां प्रियाम् । कौडिन्यउवाच — शीले ममेदमुत्पन्नं सहसा शोककारणम् ॥७६॥ येनातिदुःखमस्माकं जातः सर्वधनक्षयः ॥ स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते ॥७७॥ शरीरे नित्य संतापः खेदश्चेतसि दारुणः । जानासि दुर्नयः कोऽत्र किं कृत्वा सुकृतं भवेत् ॥७८॥ प्रत्युवाचाथ तं शीला सुशीला शीलमण्डना । प्रायोऽनन्त कृताक्षेप पापसम्भवजं फलम् ॥७९॥ भविष्यति महाभाग तदर्थं यत्नमाचर । एवमुक्तः स विप्रर्षि जगाम मनसा हरिम् ॥८०॥ निर्वेदं निर्जगामाथकौण्डिन्यः प्रगतो वनम् । तपसेकृतसंकल्पो वायुभक्षो द्विजोत्तमः ॥८१॥ मनसाध्यायमानं तं क्व द्रक्ष्यामि च तं विभुम् । यस्य प्रसादात्तज्जातमोक्षणान्निधनं गतम् ॥८२॥ धनादिकं ममातीव सुखदुःखप्रदायकम् । एवं सञ्चिन्तयन् सोऽथ बभ्राम गहने वने ॥८३॥ तत्रापश्यन् महाचूतं पुष्पितं फलितं द्रुमम् । वर्जितं पक्षिसंघातैः कीटकोटिसमावृतम् ॥८४॥ तमपृच्छद्विजोऽनन्तः क्वचिद्दृष्टो महाद्रुम । ब्रूहि सौम्य ममातीव दुःखं चेतसि वर्तते ॥८५॥ सोऽब्रवीद्भगवानन्तः क्वचिद्दृष्टोमयादिवा । एवं निराकृतस्तेन संजगामाथ दुःखितः ॥८६॥ क्व द्रक्ष्यामीतिगच्छन् स गां ददर्श सवत्सकाम् । वनमध्ये प्रधावन्तीमितश्चेतश्च पाण्डव ॥८७॥ सोऽब्रवीद्धेनुकेब्रूहि यद्यनन्तस्त्वयेक्षितः । गौरुवाचाथ कौण्डिन्यं नानन्तं वेद्म्यहं द्विज ॥८८॥ ततो व्रजन् ददर्शाग्रे वृषभं शाद्वलेस्थितम् । दृष्ट्वा पप्रच्छ गोस्वामिन्ननन्तोवीक्षितस्त्वया ॥८९॥ वृषभस्तमुवाचेदं नानन्तो विक्षितो मया । ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीद्वयम् ॥९०॥ अन्योऽन्य जल कल्लोलैर्वीचिपर्यन्त सङ्गतम् । छन्नं कमल कल्हारैः कुमुदोत्पलमण्डितम् ॥९१॥ सेवितं भ्रमरैर्हंसैश्चक्रकारण्डवैर्बकैः । तेष्य पृच्छद्द्विजोऽनन्तो युवाभ्यांनोपलक्षितः ॥९२॥ ऊचतुस्ते पुष्करिण्यौ नानन्तो वीक्षितो द्विज । ततो व्रजन् ददर्शाग्रेगर्दभं कुञ्जरं तथा ॥९३॥ तावपृच्छद् द्विजोऽनन्तो भवद्भ्यांनोपलक्षितः । एवं स पृच्छन्प्राप्तस्तत्रैव निषसादह ॥९४॥ कौण्डिन्यो विह्वलो भूतो निराशो जीविते नृप । दीर्घमुष्णं च निःश्वस्य पपात भुवि भारत ॥९५॥ प्राप्य संज्ञामनन्तेति जल्पन्नुत्थाय स द्विजः नूनं त्यक्ष्याम्यहं प्राणानीति संकल्प्य चेतसि ॥९६॥ यावदुद्बन्धनं वृक्षे चक्रे तावद् युधिष्ठिर । कृपयाऽनन्तदेवोऽपि प्रत्यक्षं समजायत ॥९७॥ वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् । प्रगृह्यदक्षिणेपाणौ गुहायां प्रविवेशत् ॥९८॥ तां पुरीं दर्शयामास दिव्यनारीनरैर्युताम् ॥ यस्यां निविष्टमात्मानं दिव्य सिंहासने शुभे ॥ पार्श्वस्थं शंख चक्राब्जगदागरुड शोभितम् । दर्शयामास विप्राय विश्वरूपमनन्तकम् ॥१०१॥ विभूतिभेदैर्द्वानन्तैरनन्तममितौजसम् । कौस्तुभेन विराजन्तं वनमालाविभूषितम् तं दृष्ट्वा देवदेवेशमनन्तमपराजितम् । वन्दमानो जगादोच्चैर्जय शब्द पुरःसरम् ॥ १०२ ॥ पापोऽहं पापकर्माहं पापात्मापापसम्भवः । त्राहिमां पुण्डरीकाक्ष सर्वपापहरोभव ॥ १०३ ॥ तच्छ्रुत्वाऽनन्तदेवेशः प्राह सुस्निग्धयागिरा । मा भैस्त्वं ब्रूहि विप्रेन्द्र यत्तेमनसि वर्तते ॥ १०४ ॥ कौण्डिन्य उवाच ॥ मया भूत्यवलिप्तेन त्रोटितोऽनन्तदोरकः । तेन पापविपाकेन भूतिर्मेप्रलयंगता ॥ १०५ ॥ स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते । निर्वेदाद्गमितेऽरण्ये तव दर्शनकांक्षया ॥ १०६ ॥ कृपया देवदेवेशत्वयात्मा संप्रदर्शितः । तस्य पापस्य मे शान्तिं कारुण्याद्वक्तुमर्हसि ॥ १०७ ॥ श्रीकृष्ण उवाच — तच्छ्रुत्वाऽनन्तदेवेश उवाच द्विजसत्तमम् । भक्त्या सन्तोषितोदेवः किं न दद्याद्युधिष्ठिर ॥ १०८ ॥ अनन्त उवाच — स्वगृहंगच्छ कौण्डिन्य मा विलम्बं कुरु द्विज । चरानन्तव्रतं भक्त्या नववर्षाणिपञ्च च ॥ १०९ ॥ सर्वपाप विशुद्धात्मा प्राप्स्यते सिद्धिमुत्तमम् । पुत्र पौत्रान् समुत्पाद्य भुक्त्वा भोगान्यथेप्सितान् ॥ ११० ॥ अन्ते मत्स्मरणं प्राप्य मामुपैस्यष्यसंशयम् । अन्यच्च ते वरं ददमि सर्वलोकोपकारकम् ॥ १११ ॥ इदमाख्यानकवरं शीलानन्तव्रतादिकम् । करिष्यति नरो यस्तु कुर्वन्व्रतमिदं शुभम् ॥ ११२ ॥ सोऽचिरात् पापनिर्मुक्तः प्राप्नोति परमाङ्गतिम् । गच्छ विप्रगृहं शीघ्रं मयायेनागतोह्यसि ॥ ११३ ॥ कौंडिन्यउवाच ॥ स्वामिन्पृच्छामि ते ब्रूहि किञ्चित् कौतूहलं मया । अरण्ये भ्रमता दृष्टस्तद् वदस्व जगद्गुरो ॥ ११४ ॥ कश्चूतवृक्षकस्तत्र का गौः को वृषभस्तथा । मयादृष्टं महारण्ये किं तत् पुष्करिणीद्वयम् । कःखरः कमलोत्पलकल्हारैः शोभितं सुमनोहरम् ॥११५॥ कुञ्जरः कोऽसौ कोऽसौ वृद्धो द्विजोत्तमः ॥ ११६ ॥ अनन्तउवाच — स चूतवृक्षो विप्रोऽसौ वेदविद्याविशारदैः । विद्या न दत्ता शिष्येभ्यस्तेनासौ तरुतांगतः ॥११७॥ या गौर्वसुन्धरा दृष्टा पूर्वं सा बीजहारिणी । वृषो धर्मस्त्वयादृष्टः शाद्वले सत्यमास्थितः ॥ ११८ ॥ धर्माधर्मव्यवस्थानं तच्च पुष्करिणीद्वयम् । ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ तत्परस्परम् ॥ ११९ ॥ धर्माधर्मादि यत्किञ्चित्तन्निवेदयतो मिथः । वियाय वेदविदुषे न दत्तं दुर्बलाय वै ॥ १२० ॥ भिक्षादत्ता न चार्थिभ्यस्तेन पापेन कर्मणा । वीचिकल्लोलमालाभिर्गच्छतस्तु परस्परम् ॥ १२१ ॥ खरः क्रोधस्तथादृष्टः कुञ्जरो मद उच्यते । ब्राह्मणोऽसावनन्तोऽहं गुहासंसार गह्वरम् ॥ १२२ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत । स्वप्नप्रायं ततो दृष्ट्वा ततः स्वगृहमागतः ॥ १२३ ॥ कृत्वाऽनन्तव्रतं सम्यक् नववर्षाणि पञ्च च । भुक्त्वा सर्वमनन्तेन यथोक्तं पाण्डुनन्दन ॥ १२४ ॥ अन्ते मत्स्मरणं प्राप्य ततोऽनन्त पुरे द्विजः । तथा त्वमपि राजर्षे कथा शृण्वन् व्रतं कुरु ॥१२५॥ प्राप्यसि चिन्तितं सर्वमनन्तस्यव चो यथा ॥ यद्वच्चतुर्दशेवर्षे फलं प्राप्तं द्विजन्मना ॥ १२६ ॥ वर्षैकेन तदाप्नोति कृत्वोपाख्यानकं व्रतम् । एतत्ते कथितं भूप व्रतानामुत्तमं व्रतं ॥ १२७ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । तेऽपि पापविनिर्मुक्ताः प्राप्स्यन्ति च हरेः पदम् ॥१२८॥ संसार गह्वर गुहासु सुखं विहर्तुर्वाञ्छन्ति ये कुरुकुलोद्भव शुद्ध सत्वः । संपूज्य च त्रिभुवनेशमनन्तदेवं बध्नन्ति दक्षिणकरे वरदोरकं ते ॥ १२९ ॥ इति श्रीमदनन्तव्रते पूजाकथा च समाप्ता । श्रीमदनन्तार्पणमस्तु ॥

अनन्तव्रत कथा—श्री सूतजी शौनक आदि ऋषियों को इस "अनन्तव्रत" कथा को सुनाया था। एक बार धर्मवीर महाराज युधिष्ठिर जरासन्ध को मारने के लिए राजसूय यज्ञ प्रारम्भ किये। उस यज्ञ में दुर्योधन शकुनी आदि भी पधारे थे। यज्ञशाला भूमि में घूमते समय दुर्योधन को स्थल के स्थान पर जल और जल के स्थान पर स्थल प्रतीत हो रहा था फल स्वरूप कई स्थानों पर गिर पड़ा, उसे गिरता हुआ देखकर सभी लोग हँसने लगे, हँसने वालों में द्रौपदी भी थी। दुर्योधन को अपना यह अपमान असह्य हो गया और वह अपने मामा शकुनी से घर लौट जाने के लिये आग्रह किया, अन्त में धूर्त शकुनी के समझाने पर यज्ञ में सम्मिलित हुआ। हस्तिनापुर लौटने पर पाण्डवों को जुआ खेलने का निमंत्रण देकर दुर्योधन ने शकुनी की सहायता से पाण्डवों की सभी राज्य सम्पत्ति जीत लिया और प्रतिज्ञा के अनुसार पाण्डव वन में चले गये। वहाँ पर श्रीकृष्णजी भेंट करने के लिये गये। यथोचित सत्कार के पश्चात् धर्मराज ने अपने इस दुःख से छुटकारा पाने के निमित्त भगवान् श्रीकृष्ण से [illegible] पूछा। श्रीकृष्ण भगवान् ने 'अनन्तव्रत' करने के लिए उन्हें उपदेश दिया। और यह भी समझा [illegible] 'अनन्त' मैं ही हूँ और यह मेरा ही व्रत है। युधिष्ठिर ने अनन्त व्रत के माहात्म्य और विधि को [illegible] पूछा, और यह भी पूछा कि पूर्व में इस व्रत को किसने किया था।

